
# || ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ ||



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 06/04/2014 | Typing Started on | H K Srinivasa Rao |
| 2 | 24/05/2014 | Typing Ended on | H K Srinivasa Rao |
| 3 | 13/06/2014 | Started First Proof Reading | H K Srinivasa Rao M S Venugopal |
| 4 | 13/06/2014 | Finished I Proof Reading | H K Srinivasa Rao M S Venugopal |
| | | | |

# ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಟ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಜ್ಞಾನ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ – ಪಿತೃದೇವೋಭವ - ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

ಗ್ರಂಥ ಋಣ: ಲೇಟ್ ಹೆಚ್ ಆರ್ ಭೀಮರಾವ್ ಅವರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಶ್ರೀ

ಶ್ರೀಪಾದರಾಜ ಸ್ತೋತ್ರಾವಳಿ

**श्री गुरुभ्यो नमः हरिः ओं**

**काले फलति सुरद्रुः चिन्तामणिरपि याचने धाता।**

**वर्षति सकलमभीष्टं दर्शना मात्रात् श्रीपादराण्मुनिः**

# श्रीनरसिंहतीर्थस्नानार्घ्य श्लोकगळु

त्रैलोक्यवन्दिते गङ्गे श्रीपादाभिष्टदे शुभे।

नृसिंहतीर्थं सम्प्राप्ते गृहाणर्घ्यं नमोस्तुते॥

अक्षोभ्यतीर्थकरपूजित नारसिंहव्यासार्चितानिल सुदेवनदीयुतेड्य।

श्रीपादराड्भृतिव्ययतिप्रियायह्यर्घ्यं ददामि नरसिंद सुतीर्थतुभ्यम्॥

## श्रीव्यासराजयतिकृत श्री श्रीपादराज पञ्चरत्नमालिका

वन्दे श्रीपादराजं रुचितमहृदयं पूजित श्री सहायम्
निर्धूताशेषहेयं निभृतशुभचयं भूमिदेवाभिगेयम्॥
विप्रेभ्योदत्तदेयं निजजन सदयं खण्डिताशेषमायम्
निष्टप्तस्वर्णकायं बहुगुणनिलयं वादिरङ्गैरजेयम्॥1॥

क्षुभ्यद्वादि करीन्द्र वादपटली कुम्भच्छटा भेदन
प्रौढप्राभवतर्कसङ्घनिकरश्रेणीविलासोज्वलः॥
गोपीनाथ महीध्रशेखरलस्पादस्थळावासकृ-
त्पायान्मां भवघोरकुञ्जरभयाच्छ्रीपादराट् केसरी॥2॥

बिभ्राणं क्षौमवासः करधृतवलयं हारकेयूरकाञ्ची।
ग्रैवेय सर्वर्णमाला मणगणखचितानेक भूषाप्रकर्षम्॥
भुञ्जानं षष्टिशाकं हयगजशिबिकानर्घ्य शय्यारथाढ्यम्।
वन्दे श्रीपादराजं त्रिभुवनविदितं घोरदारिद्र्य शान्त्यै॥3॥

यद्बृन्दावन सेवया सुविमलां विद्यां पशून् सन्ततिम्।
ध्यानाज्ज्ञानमनल्पकीर्तिनिवहं प्राप्नोतिसौख्यं जनः।
तं वन्दे नरसिंहतीर्थनिलयं श्रीव्यासराट् पूजितम्।
ध्यायन्तं मनसा नृसिंहचरणां श्रीपादराजं गुरुम्॥4॥

काशी केदार माया करिगिरि मधुरा द्वारका वेङ्कटाद्रि।

श्रीमुष्णक्षेत्र पूर्वं त्रिभुवनविलसत्पुण्यभूमीनिवासः॥

गुल्मादिव्याधिहर्ता गुरुगुणनिलयो भूतभेतालभेदी।

भूयाच्छ्रीपादराजो निखिल शुभतति प्राप्तये सन्ततं नः॥5॥

## श्रीवादिराज विरचित श्री श्रीपादराजस्तोत्रं (अश्वधाटि)

द्वैपायनोत्तमकरोपागतां पवनरूपामितेक्षमहिताम्
गोपाङ्गनेशतनुमापातमर्चयितुमापाद्ययोहि यतिताम्।
स्वापास्त भूपकृत शापासिघातनिजतापार पापनिचयम्
श्रीपादराजवरशापायुधंभजितसोपान्नलोलुपधियः॥1॥

कापालिकांशवरकोपातिवित्तयति भूपारकाङ्क्षि कुलभू
भूपावनामितधियापावितातिशुभ रूपाब्जनाभ सुयतेः।
गोपायितान्वय सुदीपाभहेमसमरूपाख्य भिक्षु वरभूः
श्रीपादराजयतिरापातनुःशुभकलापारपारमहिमा॥2॥

गोपालविठ्ठलतनूपार्थभल्लुक सुतोपासितेसमहिळे
दीपाढ्यवित्तभवनापालतेकुरुकुलापाय भूनृपतिना।
प्रापादिमादिशद्थोपाकशिष्ययतेयेपादुकेतमनयोः
श्रीपादराजयतिरापातुनोरचित भूपालपीठवसतिः॥3॥

योपागमत्स्वपुरतोपास्त बन्धुजनतापारिबर्ह सुहृदा
लापादिराग उरभूपालवर्यजन गोपाङ्गहापिततनुः।
धूपायितान्तर इवापाटवीं निशित रोपाभमातृवचसा
गोपायितात्मतनु भूपामरार्यजन गोपारवश्यकरभाः॥

हापाकआगत इहापाप सेव्यमभिरूपामरद्रुमितिमाम्
श्रीपालयापित महीपारगामिसुरशापायुधोक्त तपसा।
क्ष्मापाल पीठमथ गोपालसेव्यपद्मापाग्र्यजन्म गुरुताम्
श्रीपादराजयतिरापारयत्वयः महापयतः सपदिनः॥5॥

व्यात्ताननानान्तकसमत्तायुधोरुभुज वैत्तायनिद्विजिचम्
छेत्तानुजार्थमिवभेत्तास्वकावतसोत्तानपर्वततते:।
स्वेत्तानिळागम महोत्तानतीक्ष्णपविरौत्तानपादयतिराट्
वेत्ताह याननतनूत्तारणस्य मम तूत्ताभवार्तिमतुळाम्॥6॥

श्रीपादराजगुणवर्णन पद्य षट्कं श्रीव्यासराजयति शिष्यगणर्षभेण।
श्रीवादिराजयतिना रचितं शश्वच्छेवादरेण पठतां प्रकरोत्यभीष्टम्॥

# श्री विजयीन्द्रयतिकृत श्री श्रीपादराजाष्टकं

श्रीमद्वीरनृसिंहनामनृपतेर्भूदेव हत्याव्यथाम्
दूरीकृत्य तदर्पितोज्वलमहासिंहासने संस्थितः॥
श्रीमत्पूर्वकवाटनामकपुरे सर्वेष्टसिद्धिप्रदः
श्री श्रीपादयतीन्द्रशेखरमणे भूयात्सनः श्रेयसे॥1॥

भेरी मञ्जुळ काहली मुख महा नानाविध प्रोज्वल
ध्वान्तध्वाननिरस्तवादिनिचयः श्रीवादिराजोस्तु नः॥
सौवर्णामलदण्डचामरसितच्छत्रोरुहैमोल्लसत्
यष्टिद्वन्द्वसुपञ्चवर्णवसनो भूयात्सनः श्रेयसे॥2॥

पादत्राणयुगं क्वणत्सुचरणद्वन्द्वे न संयोज्यतत्
दुश्यास्त्रं पदकञ्जरक्षणयुगे बन्दीकृतं कूजती।
धीरान्मोचयतेति बन्दिषु पुरोर्गर्जत्सु सिंहासनम्
गच्छन्मौक्तिक कञ्चुकोज्वलतनुर्भूयत्सनः श्रेयसे॥3॥

नानाशाक सुभक्ष्यपायसघृतं प्राज्यान्न भुक्ता जने
निन्दां कुर्वति काननं गतवते यस्मैददौ श्रीपतिः।
मृष्टान्नं सघृतं पयोदधियुतं सोपस्करं कानने
गोपीनाथपदाब्जसक्तसुमनाः भूयात्सनः श्रेयसे॥4॥

चैत्रेमासि कठोरभास्करकरैस्सन्तप्तगात्राखिल
स्वान्तेवासिभिरर्थिभिः स्वतपसा निर्माय रम्यं सरः।
सारामो यतिपुङ्गवः परिजनानाप्याया मासया
च्छायातोयविहीन काननतलेर्भूयात्सनः श्रेयसे॥5॥

त्वं चेन्मां जयसिद्धि चामरधुनीं गच्छाविनोचेत्तदा
सन्यस्तोभव पण्डितेति सदसी क्षोणिपतेः पत्रिका।
आलेख्य प्रियशिष्यवर्यं यतिनां यत्याश्रमं वादिनम्
जित्वादापितत्वांश्च तस्य सुमतीर्भूयात्सनः श्रेयसे॥6॥

वैराग्यामलभक्तिनिर्मल महाज्ञानादिभाग्योज्वलः
श्रीमत् श्रीपतिरङ्गविठ्ठलपदाम्भोजः प्रभावं हृदी।
स्मारं स्मारमहर्निशं निजमहानन्दाब्धि मग्नो गुरुः
लोकानन्दकरोरु रम्यमहिमार्भूयात्सनः श्रेयसे॥7॥

यद्बृन्दावनसेवया भुविजनः प्राप्नोति सौख्यं महत्
यद्बृन्दावन मृत्तिकापिनिटिले भक्त्याधृता सेविता॥
भूतोच्छाटनकारिणी क्षयमहापस्मारगुल्माधिका-
नेक व्याधिनिवारणैककरुणिर्भूयात्सनः श्रेयसे॥8॥

# श्री श्रीनिधियतिवरेण्यकृ श्री श्रीपादराजाष्टकं

श्रीमत्या जाम्बुवत्या यदुपतिनगरे पूजितः फल्गुणेन
प्राप्तस्तेनार्चिताङ्घ्रिस्सकल सुखकरे पाण्डुरङ्गेन्तरङ्गे।
भूमौ क्षेत्रेऽथ गुप्तस्सकलबुधगुरोर्यस्य लब्धोवतान्माम्
स्वप्ने श्रीमान् रमेशः प्रभुवरतनया सत्यभामासमेतः ॥1॥

श्रीमत् श्रीपादराजप्रमुखयतिवरानादराधीतशास्त्रा-
नाहूयाति प्रमोदा प्रवदत भवतां ताव देवाद्य शिष्यः।
यावत्सामर्थ्यमस्तीत्युदितवति गुरौ प्रागुपन्यस्तु वान्यः
श्रीमानाद्यन्तयुक्ताम्बुधसदसि सुधां सोवतान्मां यतीन्द्रः ॥2

सायङ्काले कदाचित् गुणगणभरिते स्वर्णवर्णे यतीन्द्रे
दूरे ग्रामः पुरस्तात्कियति कथयमे बालकेति बृवाणे।
सूर्यमां स्थैरभांस्वं सकलबुधमणे पश्य किं त्वां बृवेहं
योवादीत्स्वर्णवर्णं गुरुमिति सहसा सोवतान्मां यतीन्द्रः ॥

जित्वानीशं नृपेण प्रबल गजपतिं कङ्कणद्वन्द्वमेकम्
यस्मै दत्तं मनोज्ञं तदनुनरपते भोगनार्योनि शायाम्
यद्रूपः श्रीरमेशः परिजनसहिते जागरूके द्वितीयम्
दत्तं भूपाळमौळौ पुनरपि ददता सोवतान्मां यतीन्द्रः ॥4॥

पातुः श्रीपादराज सखिवर रघुनाथार्ययुक्तः कदाचित्।
गङ्गास्नानाय गच्छन् पतिनृपसदनं प्राप्य भैक्षं ययाचे॥
पादप्रक्षाळनार्थं स्थितवयतियतिपेर्भर्त्सनादस्य कोपात्
गेहे धग्धेति नम्रं पदयुगळगतं योररक्षावनीशम्॥5॥

यच्छिष्यो व्यासराजः प्रतिभटजनता सर्वगर्वापहर्ता
कर्ता ग्रन्थत्रयस्य प्रतिभटविजय प्रोच्छशास्त्रोत्तमस्य।
प्रख्याता यत्प्रशिष्या जगति च विजयीन्द्राख्य योगीन्द्रचन्द्रा
श्रीमत् श्रीवादिराज प्रमुखयतिवरा सोवतान्मां यतीन्द्रः॥6॥

यद्वाग्वज्राभिदोच्छ प्रबलतम महाग्रन्थवज्रेण हृष्य
दुर्वाधिक्ष्माधराणां यतिवरसुरपच्छेदयामास पक्षान्।
यस्य श्रीवादिराजप्रमुखयतिवरैर्वर्णितं नैव शक्यम्
माहात्म्यं तापसेन्द्रः सभवतुनितरां भूयसेश्रेयसे मे॥7 ॥

नीलापार्थार्चिताङ्घ्रिः कलुषचयहरे भीमरथ्यासुतीरे
रङ्गक्षेत्रेथऽगुप्तः सकलसुरपतिर्वेणुगोपालकृष्णः।
स्वप्ने लब्धोयमस्या द्विजवर गुरवे व्यासराजाययेना-
दायी श्रीपादराजः स भवतु नितरां भूयसे श्रेयसे मे॥8॥

# श्री श्रीनिधियतिवरेण्यकृत नवपद्य सुरत्नमाला

श्रीकान्ततीर्थगुरुराजकराब्जजात श्रीश्रीनिधीर्यतिरुदार गुणोल्लसन्तीम्।
श्रीपादराज नवपद्य सुरत्नमालांभक्त्या करोमि गुरुराज वरप्रसादात्॥1॥

श्रीपूर्णबोधकुलवार्धिसुधाकराय श्रीव्यासराजगुरवेर्यतिशेखराय।
श्रीरङ्गविठ्ठलपदाम्बुजबम्भराय श्रीपादराजगुरवेस्तु नमः शुभाय॥2॥

सम्पूरिताखिलजनोरु मनोरथाय श्रीमन्नृसिंहसरसीतटसंस्थिताय।
श्रीमत्सुवर्णसमवर्णकराब्जजायश्रीपादराजगुरवेस्तु नमश्शुभाय॥3॥

श्रीव्यासराजफणिबन्धनिवारकाय तद्भाषयैव फणिराज सुतोषकाय।
श्रीमत्सुरत्नखचितोज्वलकुण्डलाय श्रीपादराजगुरवेस्तु नमश्शुभाय॥4॥

श्रीगोपिकापतिनिवेदित षष्टिशाका मुख्योरु भोजन विदूषणतत्पराणाम्।
सन्दर्शितोरु निजकुक्षिगतार्द्रशाखा श्रीपादराजगुरवेस्तु नमश्शुभाय॥5॥

श्रीमद्यतीश रघुनाथमुनेर्विमानात् पुष्पे स्वमूर्ध्निप्रततिप्रशमीक्ष चोस्त्वा।
सम्प्रेरितोरु रघुनाथमुनीश्वराय श्रीपादराजगुरवेस्तु नमश्शुभाय॥6॥

शङ्खस्थितेन पयसा द्विजघातपापे दूरीकृते बहुजनेषु विशङ्कितेषु।
तैनैव शुद्धमलिनातिपटिच्छराय श्रीपादराजगुरवेस्तु नमश्शुभाय॥7॥

श्रीमन्नृसिंहसरसी पयसि प्रमादाद्ध्यायामि तिष्ठ सरसी शुभकारि तीरे।

स्वप्ने निर्बोध्य नळिनी जयदक्षगाभूत् श्रीपादराजगुरवेस्तु नमश्शुभाय॥8॥

दुर्वादिवारणविधारण दीक्षितायश्रीमद्रमेशचरणाब्जगृहाश्रयाय।

व्यारव्यानिनाद् रुचिरोरु मृगाधिपायश्रीपादराजगुरवेस्तु नमश्शुभाय॥9॥

कस्तूरिकादि समलङ्कृत दिव्यदेहंदृष्ट्वा विदूषयति मूढजने क्षणेन।

तत्यागधारित  तनूः परिरक्षकायश्रीपादराजगुरवेस्तु नमश्शुभाय॥10॥

श्रीपादराज नवपद्य सुरत्नमालां येधारयन्त्यनुनुदिनं भुविशुद्ध भावाः।

वृन्दावनस्य पुरतस्सकलेष्टदश्च श्रीपादराजगुरुराज हृदब्जवासी॥11॥

श्रीकृष्णार्पणमस्तु